# shAlagrAmastotram

# શાલગ્રામસ્તોત્રમ્

## Document Information

Text title : shAlagrAmastotram shAligrAmastotram

File name : shAlagrAmastotram.itx

Category : vishhnu, vishnu_misc, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, Nat Natarajan

Description-comments : bhaviShyottarapurANa (mispronounced as shAligrAma)

Latest update : August 3, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2022

*sanskritdocuments.org*

# શાલગ્રામસ્તોત્રમ્

શ્રીરામં સહ લક્ષ્મણં સકરુણં સીતાન્વિતં સાત્ત્વિકં
વૈદેહીમુખપદ્મલુબ્ધમધુપં પૌલસ્ત્યસંહારિણમ્ ।
વન્દે વન્દ્યપદાંબુજં સુરવરં ભક્તાનુકંપાકરં
શત્રુઘ્નેન હનૂમતા ચ ભરતેનાસેવિતં રાઘવમ્ ॥ ૧॥

જયતિ જનકપુત્રી લોકભર્ત્રી નિતાન્તં
જયતિ જયતિ રામઃ પુણ્યપુઞ્જસ્વરૂપઃ ।
જયતિ શુભગરાશિર્લક્ષ્મણો જ્ઞાનરૂપો
જયતિ કિલ મનોજ્ઞા બ્રહ્મજાતા હ્યયોધ્યા ॥ ૨॥

શ્રી ગણેશાય નમઃ ।
અસ્ય શ્રીશાલગ્રામસ્તોત્રમન્ત્રસ્ય શ્રીભગવાન્ ઋષિઃ,
નારાયણો દેવતા, અનુષ્ટુપ્ છન્દઃ,
શ્રીશાલગ્રામસ્તોત્રમન્ત્રજપે વિનિયોગઃ ॥

યુધિષ્ઠિર ઉવાચ ।
શ્રીદેવદેવ દેવેશ દેવતાર્ચનમુત્તમમ્ ।
તત્સર્વં શ્રોતુમિચ્છામિ બ્રૂહિ મે પુરુષોત્તમ ॥ ૧॥

શ્રીભગવાનુવાચ ।
ગણ્ડક્યાં ચોત્તરે તીરે ગિરિરાજસ્ય દક્ષિણે ।
દશયોજનવિસ્તીર્ણા મહાક્ષેત્રવસુન્ધરા ॥ ૨॥

શાલગ્રામો ભવેદ્દેવો દેવી દ્વારાવતી ભવેત્ ।
ઉભયોઃ સઙ્ગમો યત્ર મુક્તિસ્તત્ર ન સંશયઃ ॥ ૩॥

શાલગ્રામશિલા યત્ર યત્ર દ્વારાવતી શિલા ।
ઉભયોઃ સઙ્ગમો યત્ર મુક્તિસ્તત્ર ન સંશયઃ ॥ ૪॥

આજન્મકૃતપાપાનાં પ્રાયશ્ચિત્તં ય ઇચ્છતિ ।

શાલગ્રામશિલાવારિ પાપહારિ નમોઽસ્તુ તે ॥ ૫॥

અકાલમૃત્યુહરણં સર્વવ્યાધિવિનાશનમ્ ।
વિષ્ણોઃ પાદોદકં પીત્વા શિરસા ધારયામ્યહમ્ ॥ ૬॥

શઙ્ખમધ્યે સ્થિતં તોયં ભ્રામિતં કેશવોપરિ ।
અઙ્ગલગ્નં મનુષ્યાણાં બ્રહ્મહત્યાદિકં દહેત્ ॥ ૭॥

સ્નાનોદકં પિવેન્નિત્યં ચક્રાઙ્કિતશિલોદ્ભવમ્ ।
પ્રક્ષાલ્ય શુદ્ધં તત્તોયં બ્રહ્મહત્યાં વ્યપોહતિ ॥ ૮॥

અગ્નિષ્ટોમસહસ્રાણિ વાજપેયશતાનિ ચ ।
સમ્યક્ ફલમવાપ્નોતિ વિષ્ણોર્નૈવેદ્યભક્ષણાત્ ॥ ૯॥

નૈવેદ્યયુક્તાં તુલસીં ચ મિશ્રિતાં વિશેષતઃ પાદજલેન વિષ્ણોઃ ।
યોઽશ્નાતિ નિત્યં પુરતો મુરારેઃ પ્રાપ્નોતિ યજ્ઞાયુતકોટિપુણ્યમ્ ॥ ૧૦॥

ખણ્ડિતાઃ સ્ફુટિતા ભિન્ના વહ્નિદગ્ધાસ્તથૈવ ચ ।
શાલગ્રામશિલા યત્ર તત્ર દોષો ન વિદ્યતે ॥ ૧૧॥

ન મન્ત્રઃ પૂજનં નૈવ ન તીર્થં ન ચ ભાવના ।
ન સ્તુતિર્નોપચારશ્ચ શાલગ્રામશિલાર્ચને ॥ ૧૨॥

બ્રહ્મહત્યાદિકં પાપં મનોવાક્કાયસમ્ભવમ્ ।
શીઘ્રં નશ્યતિ તત્સર્વં શાલગ્રામશિલાર્ચનાત્ ॥ ૧૩॥

નાનાવર્ણમયં ચૈવ નાનાભોગેન વેષ્ટિતમ્ ।
તથા વરપ્રસાદેન લક્ષ્મીકાન્તં વદામ્યહમ્ ॥ ૧૪॥

નારાયણોદ્ભવો દેવશ્ચક્રમધ્યે ચ કર્મણા ।
તથા વરપ્રસાદેન લક્ષ્મીકાન્તં વદામ્યહમ્ ॥ ૧૫॥

કૃષ્ણે શિલાતલે યત્ર સૂક્ષ્મં ચક્રં ચ દૃશ્યતે ।
સૌભાગ્યં સન્તતિં ધત્તે સર્વ સૌખ્યં દદાતિ ચ ॥ ૧૬॥

વાસુદેવસ્ય ચિહ્નાનિ દૃષ્ટ્વા પાપૈઃ પ્રમુચ્યતે ।
શ્રીધરઃ સુકરે વામે હરિદ્વર્ણસ્તુ દૃશ્યતે ॥ ૧૭॥

વરાહરૂપિણં દેવં કૂર્માઙ્ગૈરપિ ચિહ્નિતમ્ ।
ગોપદં તત્ર દૃશ્યેત વારાહં વામનં તથા ॥ ૧૮॥

પીતવર્ણં તુ દેવાનાં રક્તવર્ણં ભયાવહમ્ ।
નારસિંહો ભવેદ્દેવો મોક્ષદં ચ પ્રકીર્તિતમ્ ॥ ૧૯॥

શઙ્ખચક્રગદાકૂર્માઃ શઙ્ખો યત્ર પ્રદૃશ્યતે ।
શઙ્ખવર્ણસ્ય દેવાનાં વામે દેવસ્ય લક્ષણમ્ ॥ ૨૦॥

દામોદરં તથા સ્થૂલં મધ્યે ચક્રં પ્રતિષ્ઠિતમ્ ।
પૂર્ણદ્વારેણ સઙ્કીર્ણા પીતરેખા ચ દૃશ્યતે ॥ ૨૧॥

છત્રાકારે ભવેદ્રાજ્યં વર્તુલે ચ મહાશ્રિયઃ ।
ચિપિટે ચ મહાદુઃખં શૂલાગ્રે તુ રણં ધ્રુવમ્ ॥ ૨૨॥

લલાટે શેષભોગસ્તુ શિરોપરિ સુકાઞ્ચનમ્ ।
ચક્રકાઞ્ચનવર્ણાનાં વામદેવસ્ય લક્ષણમ્ ॥ ૨૩॥

વામપાર્શ્વે ચ વૈ ચક્રે કૃષ્ણવર્ણસ્તુ પિઙ્ગલમ્ ।
લક્ષ્મીનૃસિંહદેવાનાં પૃથગ્વર્ણસ્તુ દૃશ્યતે ॥ ૨૪॥

લમ્બોષ્ઠે ચ દરિદ્રં સ્યાત્પિઙ્ગલે હાનિરેવ ચ ।
લગ્નચક્રે ભવેદ્યાધિર્વિદારે મરણં ધ્રુવમ્ ॥ ૨૫॥

પાદોદકં ચ નિર્માલ્યં મસ્તકે ધારયેત્સદા ।
વિષ્ણોર્દૃષ્ટં ભક્ષિતવ્યં તુલસીદલમિશ્રિતમ્ ॥ ૨૬॥

કલ્પકોટિસહસ્રાણિ વૈકુણ્ઠે વસતે સદા ।
શાલગ્રામશિલાબિન્દુર્હત્યાકોટિવિનાશનઃ ॥ ૨૭॥

તસ્માત્સમ્પૂજયેદ્ધ્યાત્વા પૂજિતં ચાપિ સર્વદા ।
શાલગ્રામશિલાસ્તોત્રં યઃ પઠેચ્ચ દ્વિજોત્તમઃ ॥ ૨૮॥

સ ગચ્છેત્પરમં સ્થાનં યત્ર લોકેશ્વરો હરિઃ ।
સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૨૯॥

દશાવતારો દેવાનાં પૃથગ્વર્ણસ્તુ દૃશ્યતે ।
ઈપ્સિતં લભતે રાજ્યં વિષ્ણુપૂજામનુક્રમાત્ ॥ ૩૦॥

કોટ્યો હિ બ્રહ્મહત્યાનામગમ્યાગમ્યકોટયઃ ।
તાઃ સર્વા નાશમાયાન્તિ વિષ્ણુનૈવેદ્યભક્ષણાત્ ॥ ૩૧॥

વિષ્ણોઃ પાદોદકં પીત્વા કોટિજન્માઘનાશનમ્ ।
તસ્માદષ્ટગુણં પાપં ભૂમૌ બિન્દુનિપાતનાત્ ॥ ૩૨॥

રઘુવર! યદભૂસ્ત્વં તાદૃશો વાયસસ્ય
   પ્રણત ઇતિ દયાલુર્યસ્ય ચૈદ્યસ્ય કૃષ્ણ! ।
પ્રતિભવમપરાદ્ધુર્મુગ્ધસાયુજ્યદોભૂર્-
   વદ કિમુ પદમાગસ્તસ્ય તેઽસ્તિક્ષમાયાઃ ॥ ૧॥

મહ્યં મનઃ ફલમિદં મધુકૈટભારે
   મત્પ્રાર્થનીય મદનુગ્રહ એષ એવ ।
ત્વદ્ભૃત્યભૃત્યપરિચારકભૃત્યભૃત્ય-
   ભૃત્યસ્ય ભૃત્ય ઇતિ માં સ્મર લોકનાથ ॥ ૨॥

। ઇતિ શ્રીભવિષ્યોત્તરપુરાણે શ્રીકૃષ્ણયુધિષ્ઠિરસંવાદે
શાલગ્રામસ્તોત્રં સમ્પૂર્ણમ્ ।
શાલિગ્રામસ્તોત્રં

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com, Nat Natarajan

*shAlagrAmastotram*

pdf was typeset on June 4, 2022

Please send corrections to *sanskrit@cheerful.com*